रां श्रियं नित्यमुपाश्रयंते ॥ इति श्रीशारदातिलके द्वादशः पटलः १२ ॥ गुणेति गुणैस्त्रिभिः
वसुभिरष्टभिः पर्वताश्च सप्त पंक्तिर्दश वेदाश्चत्वारि अग्नयस्त्रीणि चंद्र एकः अश्विनौ द्वौ वाग्बीज
शक्तिबीजाद्या मातंगिगंता ॐ ऐं तस्यै मातंगिन्यै नमः इत्यादिप्रकारेण उक्तस्थानेषु न्यसेदित्यर्थः
पुनरुक्तस्थानेषु ॐ ह्रीं हेरंबाय मातंगिन्यै नमः ॐ गं गगनायै मातंगिन्यै नमः इत्यादिप्रकारेण न्यसेत्
तत उक्तरीत्या षडंगन्यासं कुर्यात् ततो द्रां द्राविण्यै मातंगिन्यै नमः इत्यादिप्रकारेणोक्तस्थानेषु पंचबा
णान्न्यसेत् तत उक्तस्थानेषु मन्मथादीनष्टौ न्यसेत् कथं ॐ ऐं ह्रीं श्रीं मन्मथाय मातंगिन्यै नमः इ।
त्यादिप्रकारेणाष्टौ न्यस्तव्याः ततोक्तस्थानेषु लक्ष्म्यै मातंगिन्यै नमः ॐ सरस्वत्यै मातंगिन्यै नमः इत्या
दिप्रकारेणाष्टौ न्यस्तव्याः ततोक्तस्थानेषु ब्राह्म्याद्या मातरो न्यस्तव्याः मातंगीपदयुक्ता इमाः अनंतर
नेषु वेस्थानेषु असितांगादिभैरवाष्टकं ततो वक्ष्यमाणस्थानेषु वामादीः शक्तीर्न्यसेत् विंदोल
लाटांते कलापदे न तदा परिमूर्धस्थानानि रोपिका तस्मै उपरि तस्माडपरि षट्परिद्वादशांतपर्यंते।

शा॰ टी॰
ति॰
९२

62

प्रक्रमेण न्यस्य ततो वक्ष्यमाणध्यानेन महामातंग्या ध्यात्वा न्यसनं भाः कथं ॐ ह्रीं श्रीं महामातंगिन्यै नमः म
हालक्ष्म्यै महामातंगिन्यै नमः सिद्धलक्ष्म्यै महामातंगिन्यै नमः इत्यादि पूर्वोक्तप्रकारेण पूर्वोक्तवीजत्रया
दिकाद्यं न्यसेत् ततो मूलमंत्रमाधारमंडले न्यस्य तेनैव व्यापकं न्यसेत् ततो वक्ष्यमाणवर्त्मना ध्यायेत् वल्ल
कीवीणां मूर्तिकांशंखपत्रं शंखमयकर्णाभरणं बिभ्रमदविवशां आसवमदपरवशाम् चित्रको
ड्रासिभालां चित्रकेण शुक्लकुसुमपीतादिवर्णरेखाभिः शोभितललाटं एवंविधां देवीं ध्यायेत् पूजा
प्रकारमाह चित्रकोणमित्यादिना पीठमंत्रमुद्धरति सर्वांते ॐ पूर्वोक्तवीजत्रयादिको यं मंत्रः स्पष्टः देव
तां जगतामित्यतः प्रार्थना पूजा होम परो ग्रन्थः स्पष्टः प्राणायामानंतरमित्यादिनित्यपूजा प्रायेणेति स्प
तेनिगदव्याख्यानम् ॥ इति श्रीशारदातिलकटीकायां द्वादशः पटलः १२ ॐ त्रिपुरादिकथना
नंतरं गणेशमंत्रान्वक्तुमारभते अथ वक्ष्ये गणपतेर्मंत्रान्सर्वसमृद्धिदान् यज्ज्ञात्वा साधका नित्यं
साधयंति मनोरथान् ॥ मंत्रमुद्धरति ॥ पंचांतकं शशिशिखं परबीजं गणपतेर्विदुः गणकः स्यादृषि
श्छंदो निचृद्धि गुरुदेवता षड्दीर्घभाजा वीजेन कुर्यादंगक्रियां मनोः । सिंदूराभं त्रिनेत्रं पृथुतरजठ
रं हस्तपद्मैर्दधानं दंतं पाशांकुशेष्टान्युरुकरविलसद्वीजपूराभिरामं बालेंदुद्योतिमौलिं करिपति
वदनं दानपूरार्द्रगंडं भोगींद्राबद्धभूषं भजत गणपतिं रक्तवस्त्रांगरागं । वेदलक्षं जपेन्मंत्रं दशांशं
हुयात्ततः मोदकैः पृथुकैर्लाजैः सक्तुभिरिक्षुपर्वभिः नीत्वा दिशाभिर्विभुं केपीठे विघ्नेशं यजेत् ती
व्रा ज्वालिनी नंदा भोगदा कामरूपिणी उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी सर्वादिशक्तिक
मलासनाय हृदयावधिः पीठमंत्रोयमेतेन प्रदद्यादासनं विभोः मूलेन मूर्तिं संकल्प्य तस्यां विघ्नेश्वरं यजेत्

नारिकेलैस्तिलैः शुद्धैः सुपक्वैः कदलीफलैः ग्रह
द्रव्याणि विघ्नस्य कथितानि मनीषिभिः ३

कर्णिकायां चतुर्दिक्षु प्रथमं पूजयेदिमान् गणाधिपं गणेशानं स्तृतीयं गणनायकं गणक्रीडं पीतगौर
रक्तनीलरुचः क्रमात् सर्वान्नागेंद्रभूषाढ्यान्मूलवल्लसितपुष्करान् यथापूर्वं ततोऽभ्यर्च्येत्केसरेष्वंगदेवता
पत्रमध्येषु विधिवद्वक्रतुंडादिकान्यजेत् वक्रतुंडमेकदंष्ट्रं महोदरगजाननौ लंबोदराख्यं विकटं विघ्न
राजमनंतरं धूम्रवर्णं दलाग्रेषु ब्राह्म्याद्याः पूजयेत्ततः लोकपालांस्तदस्त्राणि देवमित्थं समर्चयेत्
सिद्धे मंत्रे प्रकुर्वीत प्रयोगान्कल्पचोदितान् तर्पयेत्सलिलैः शुद्धैर्दिनशो गणनायकं चतुश्चत्वारिंशदा।
ढ्यं चतुःशतमतंद्रितः आप्नुयान्मंडलादर्वागभीष्टमधिकं नरः नारिकेलैः कृतो होमश्चतुर्थ्यां श्रीप्र
दो भवेत् शुक्लपक्षप्रतिपदमारभ्य दिनशः सुधीः चतुर्थ्यंतं नारिकेलैः सकुलाजतिलैः क्रमात् चतुःश
तं प्रजुहुयाद्वत्सरात्सः सर्वजेतवः सतिलैस्तंडुलैर्होमो लक्ष्मीवश्यप्रदो भवेत् लाजैस्त्रिमधुरोपेतैर्होमः
कन्याप्रदः स्मृतः अनेन विधिना कन्या वरमाप्नोति वांछितं अपूपाक्तहविषा होमः साधयेदीप्सितं नृणां
दध्ना विलोडितैर्लोणैर्होमो निशि चतुर्दिने संवादकृत्तेन नृणां वश्यं वितनुते सदा श्वेतार्कभवमूलेन रक्तचं
दनदारुणा इभमग्रेन विंबेन दंतिदंतेन वाकृते विघ्नेश्वरं समभ्यर्च्य शीतांशुग्रहणे जपेत् स्पृष्ट्वा मंत्री नि
शाहारसंशिखायां समुद्वहन् प्रविशेद्व्यवहारादौ विजयश्रियमाप्नुयात् मंत्रेणानेन संजप्तां रोचनामद
संयुतां तिलकं क्रियया सर्वान्वशं नयति मानवान् अनुलोमविलोमस्थबीजेनाम समालिखेत् नवने
ति समभ्यर्च्य सहस्राग्राणमंत्रे जपेत् अष्टोत्तरशतं भूयो मूलमंत्रप्रजप्तं भक्षयेन्मौनमास्थाय याभिन्या
समवाप्सरं सर्वरूपो जायते शीघ्रं सा पकस्यनसंशयः ॥ पंचांतकोष्ठगकारः षाष्ठिपरो बिंदुयुक्तः
गमितिसिद्धं दानस्वरं मदः स्यां वेदलक्षं चतुर्लक्षं हृदयावधिः नमस्कारावधिः भक्तपलक्षितपुष्करान्

प्रा॰ त॰ लटूकयुक्तं संज्ञात् यथा सर्वे प्रजापटलोक प्रकारेणानुलोमविलोमवीजक्रमात् क्रमलिखित
ति॰ वीजं कथयं देवदत्तं गमहागणपतिमंत्रमुद्धरति ॥ ओंश्रींक्लींसारभूविघ्नवीजानि प्रथमं वदेत् तुं॰
६१ नगणपतिपश्चाद्वरांतेवरदपदं उक्त्वा सर्वजनंमेंतेवशमानयठद्वयं अष्टाविंशद्भिर्णोयं नाराघोम
उरीरितः गणकः स्यादृषिश्छंदोगायत्रीनिवृदविता महागणपतिःप्रोक्तोदेवतादेववंदिता षड्बीज
63 स्यस्ववीजेन दीर्घभाजाषडंगकल्पयेत् षडंगानि मनोरस्य यथाविधिविधानवित् नवरत्नमयंद्वीपं स्मरे
दिक्षुरसांबुधौ तद्वीचीधौतपर्यन्तेमंदमारुतसेविते मंदारपारिजातादिकल्पवृक्षलताश्रिते तद्रुतर
त्नच्छायाभिररुणीकृतभूतले उद्यद्दिनेकरेंदुभ्यांसुद्धासितदिगंतरे तस्य मध्ये पारिजातं नवरत्नम
यं स्मरेत् रत्नभिःसेवितंषड्भिरनिशंप्रीतिवर्धनैः तस्याधस्तान्महापीठे रचितेमातृकाब्जे षट्कोणा
तस्त्रिकोणस्य महागणपतिंस्मरेत् । हस्तींद्राननमिंदुचूडमरुणच्छायंत्रिनेत्रंरसादाश्लिष्टंप्रियया
सपद्मकरयास्वांकस्थयासंततं वीजापूरगदाधनुस्त्रिशिखचक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाण
रा रत्नकलशान्हस्तैर्वहंतंभजे । गंडपालीगलद्दानपूरलालसमानसा द्विरेफान्कर्णतालाभ्यां वारयंतंमुहु
र्मुहुः कराग्ररत्नमाणिक्यकुंभवक्त्रविनिर्गतैः रत्नवर्षैःप्रीणयंतंसाधकान्मदविह्वले माणिक्यमुकुटो
पेतं रत्नाभरणभूषितं ध्यायेन्मंत्रं जपेन्मंत्री चतुर्लक्षंसमाहितः ततः सहस्रसंयुक्ते चत्वारिंशत्सहस्रके
दशांशं जुहुयाद्द्रव्यैरष्टभिर्मोदकादिभिः तर्पयेद्दिनशोविघ्नं प्राग्लक्षेनैववर्त्मना प्रागुक्तेपूजयेत्पीठे
विधिनागणनायकं त्रिकोणवाह्ये सर्वादिचतुर्दिक्षुसमर्चयेत् प्रथमस्य विल्वमूलायः श्रियं श्रीपति
मर्चयेत् पद्महस्तमयरायप्रशांखवक्रधरोहरिः इतिणवस्तूताधोगौरींगौरीपतिंयजेत् पाशांकुशधरा

...गौरीरंकस्थलधरो हरः पश्चिमे पिप्पलस्याधो रतिं रतिपतिं यजेत् रतिर्हृत्पलहस्ता स्यात्कोदंडशर
धरः स्मरः सौम्ये प्रियंगुवृक्षस्याधो महीं पोत्रिणमर्चयेत् शुकव्रीह्यग्रहस्ता भूर्गदाचक्रधरः पतिः षट्स
कोणेषु संस्थाप्यामोदाद्याः प्रियान्विताः आमोदं सिद्धिसहितमग्निकोणे समर्चयेत् समृद्ध्या गुणमा।
भ्यर्चेत्प्रमोदं वह्निकोणतः सुमुखं कांतिसंयुक्तमीशकोणे समर्चयेत् दुर्मुखं मदनावत्या यजेद्दक्ष
णकोणके विघ्नं मदद्रवायुक्तं कोणे नैर्ऋते यजेत् वायव्ये विघ्नकर्तारं द्राविण्या सहसंयजेत् पाशां
कुशाभयाभीष्टधारिणोरुणविग्रहाः गंडभीतिगलद्दानस्रवयौवनसुखोद्भवाः विघ्नास्तन्मदाः सर्वाः
सदा सस्मितलोचनाः पुष्करस्था भुजपाशैरनालिंगितप्रिया षट्कोणपार्श्वयोः शंखपद्मनिधी क्र
मात् निजप्रियाभ्यां सहितौ शंखपद्मादीरितलक्षणौ केसरेष्वंगषट्कं स्याद्ब्राह्म्याद्याः पद्ममध्यगाः बहिर्लोके
श्वराः स्युरस्त्रा वज्रादीनि ततः परं इत्थं जपादिभिः सिद्धः प्रयोगान्स्वमनीषितान् साधयेद्दशभिर्द्रव्यैरन्यैर्वा
कल्पचोदितैः पद्महोमेन भूपालस्तत्पन्नीकृतपलैः शुभैः मंत्रिणः कुमुदैः पुष्पैर्विप्रान्पिप्पलसंभवैः स
मिद्भिरेनं नृपतीनुडुंबरसमुद्भवैः ललैर्वैश्यान्वटोद्भूतैः शूद्रान्मंत्री वशं नयेत् मधुना स्वर्णलाभः स्यादु
दुग्धेन लभते गाः आज्यहोमेन महतीं श्रियमाप्नोति मानवः दध्ना सर्वसमृद्धिः स्यादन्नैरन्नपतिर्भवेत्
वृष्टिकामः प्रजुहुयाद्वेतसानां समिद्वरैः कुसुमैः कुसुमैर्हुत्वा वासांसि लभते चिरात् प्रत्येकमादौ मूले
न चत्वारिंशत्प्रतर्पयेत् ततस्तु तः एवं च श्रीशौ शंखपद्मनिधी पुनः नामादिबीजसहितौ तर्पयेत्स्वप्रियान्वि
तौ तर्पणे नाम नाम्नां स्वीयां मिश्रमाप्नोति मंडलात् स्मृतिः संमासमौ विंडुयुक्तं च बीजमीरितं ॥ श्रीशा
कीति प्रथमर्थः एवं प्रणव श्रीशक्तिस्मरभूगणपतिबीजान्युच्चार्य चतुर्थ्यंतेन गणपतिमुच्चार्य पा।

गा॰ दा॰
ति॰
६४

64

आहरवरदसर्वजनंमेवशमानयठःठःस्वाहाकारः एषोष्टाविंशत्यक्षरः महागणपतिमंत्रः षड्बीजाः
स्वबीजेनेति ॐ ह्रीं श्रीं क्लीं ग्लौं गां हृदयाय नमः इत्यादिप्रकारेण न्यासं कुर्यात् अथवा गां हृदयाय नमः
श्रीं गीं शिरसे स्वाहा ह्रीं गूं शिखायै वषट् क्लीं गैं कवचाय हुं ग्लौं गौं नेत्रत्रयाय वौषट् गं गः अस्त्राय फट्
गंडपालीगंडस्थलं गलद्दानपूरः स्फुरन्मदप्रवाहः भ्रूबीजमुद्धरतिस्मृतिः गकारः मांसलकारः स्फुर
द्रूपविंदुयुक्ते अनुस्वारयुक्ते ततः ग्लौं इति सिद्धं यंत्रमुद्धरति ॥ बीजंषट्कोणमध्येस्फुरदनलपुरो।
तारगंदिक्षुलक्ष्मीमायाकंदर्पभूमीसदनुरसपुटेष्वालिखेद्बीजषट्कं तत्संधिषुगमंत्रान्वसुदलकम
लेमूलमंत्रस्यवर्णान्शिष्टान्पत्रेषुविद्वान्विलिखतुगणशक्तिंतत्पमंत्रंपलाशे । आवीतंलिपिभिःक्रमो
त्क्रमवशात्पाशांकुशाभ्यामपि स्यादेतद्धिह्रितयेनवेष्टितमिदंयंत्रंगणाधीशितुः लाक्षाकुंकुमरोचनामृ
गमदैर्भूर्जेविरेखेह्यथवा संलिख्याभिवद्धलभेतसकलैःसंप्रार्थनीयांश्रियं । उक्तंमहागणपतेर्विधाने
स्मरसंजिते सर्वसिद्धिकरंपुंसांसम्यक्पुरुषार्थदं ॥ बीजषट्कोणमध्यइति अस्यार्थः त्रिकोणंलि।
खित्वा तन्मध्येप्रणवं तन्मध्येगंतद्बहिः षट्कोणंत्रिकोणाद्बहिः विलिख्ययथाक्रमं श्रींह्रींक्लीं इतिलिखे
त् षट्कोणेषुप्रणवादिषट्बीजानिलिखेत् कोणसंधिषुगमंत्रान् तदुपरि अष्टदलपद्मंकृत्वा
तद्दलेषुशास्त्रयस्त्रयः प्रत्येकमवशिष्टवर्णान्तत्पमंत्रपदलेलिखेत् पश्चाद्बहिरनुलोमविलोमगैः प
र्वाणट्वर्णैर्वेष्टयेत् तदुपरिपाशांकुशबीजाभ्यां तदुपरिवसुधाविंबाभ्यांवेष्टितमेतद्यंत्रंमुक्तफल
प्रदं मंत्रांतरमुद्धरति ॥ मायाविरिपदद्वंद्वंततोगणपतिंवदेत् खड्गीशपावकोपश्चाद्धरदांतेपुनर्व
देत् सर्वलोकंमेपदांतेवशमानायठद्वयं षड्विंशत्यक्षरोमंत्रोभजतांकल्पपादपः गणकःस्या।

ऋषिश्छंदो गायत्रं देवतास्य मनोः विरिविघ्नेश्वरः प्रोक्तो भजतां कल्पपादपः अंतःकरणवेदेषु भूतपंचवि
लोचनैः एवं विभक्तैर्मंत्रार्णैर्मायाद्यैरंगकल्पना महागणपतेः प्रोक्ता स्थाने मंत्री विचिंतयेत्। सिंदूराभ
मिभाननं त्रिनयनं हस्तैश्च पाशांकुशौ बिभ्राणं मधुमत्कपालमनिशं साध्यैंदुमौलिं भजे पुष्ट्याश्लिष्टतनुं
ध्वजाग्रकरया पद्मोल्लसद्धस्तया तद्योन्याहितपाणिमात्तवसुमत्पात्रोल्लसत्पुष्करं। चतुर्लक्षं जपेन्मंत्री
तद्दशांशं हुतक्रिया प्राक्प्रोक्तैरष्टभिर्द्रव्यैस्त्रिमधुरैः समीरिता एवं सिद्धे जयेत्पीठे नीत्वादिनवश
क्तिके मूर्तिं मूलेन संकल्प्य तत्रावाह्यार्चयेद्विभुं मिथुनाद्गतिरामासादामोदाद्यैर्दिगंबरैः द्वितीयांगम
तीयास्याद्यव्यष्टैर्मातृभिः स्मृता पंचमी लोकपालैः स्यात्षष्ठी वज्रादिभिः स्मृता इति सिद्धमनुर्मंत्री प्र
फुल्लैः सरसीरुहैः चतुरुत्थाहृष्टशागाः सर्वं तंडुलैस्तिलमिश्रितैः हुत्वाप्रियमवाप्नोति मोदकैराज्यलोलितैः
हुत्वा विनयमाप्नोति पार्थिवो गुडभूमिश्च मधुरत्रयेण हवनेवशं नयति पार्थिवान् भक्ष्यभोज्यादिकैस्स
र्वं हुत्वाभीष्टानि साधयेत्॥ मायेति मायाबिन्दुर्लोवा विरिपदद्वंद्वं हेस्वरूपं रवङ्गीशो वकारः पावको रेफः
वरवरदस्वरूपं ठनरत्सष्टुम् एषविरिगणपति मंत्रः षट्विंशत्यक्षरः अंतःकरणं चत्वारि वेदश्चत्वारि
ठषुप्रचभूतानि ठषपंचविलोमेन हृदयम् मायासर्वत्रात्रुयस्पते ठकुनवंगजाननं ध्वजोलिंगं स्पष्टार्थ
परं मंत्रांतरमुद्धरति ॥ शक्तिरुद्धं निजं बीजं महागणपतिं वदेत् ॐ नमश्चिवस्यः प्रोक्तो मंत्रोयं द्वादशा ना
क्षरः गणकः स्याद्दृषिश्छंदो गायत्री निचृदादिका उदिता देवता तंत्रैर्नाम्ना शक्तिगणाधिपः व्यस्तैः समस्तै।
मंत्रस्य पदैरंगानि कल्पयेत्। मुक्तागौरं मदगजमुखं चंद्रचूडं त्रिनेत्रं हस्तैः स्वीयैर्दधतमरविंदांकुशौ च
कुंभं ग्रंकस्थायाः सरसिजरुचः स्वध्वजालं विपाणेर्दक्षा योनौ विनिहितकरं रत्नमौलिं भजामः। लब्ध

मेकं जपेन्मंत्रं ग्रहस्थैपेसदशांशतः जुहुयाद्दर्विनेवश्चौदिनशोदेवमर्चयेत् शाक्ताके पूजयेत्पीठे शाक
प्रोक्ते नैव वर्त्मना हुते वक्त्ररवंडैर्मेनिमान् रात्रप्रियमवाप्नुयात् नारिकेलफलैस्तद्वदिमापक्वफलैस्ततः
वशायत्यखिलं लोकं एणुकैः शर्करान्वितैः वशंनयति राजानं समकाभिर्ब्राह्मणाग्नुमैः हुतहोमेन यनवा
ज्ञायतेनात्र संशयः ॥ शक्तिरुद्धे निजे बीजे भुवनेश्वरीसंपुटित गणपतिबीजं महागणपतौ तिस्त्र।
रूपं इष्टं तेच तत्पश्चात्ते शाग्निवसः स्वाहा पञ्चदशाक्षरोमंत्रः प्रतिरोहितार्थमपरं मंत्रांतरमुद्धरति ॥
शक्तिरुद्धे निजे बीजे वशमानय तद्धृदयं नामाद्यो यंसमाख्यातो रुद्रसंख्याक्षरो मंत्रः रक्षाद्याः सर्वमुक्ताः
स्वरांगं मंत्रपदैर्भवेत् एकेनाद्यास्त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यामनेनतरं समस्तेनात्र माख्यातमंगकॢप्तिरियं म।
ता। हस्तैर्विभ्रत मित्तदंडवरदौपाशांकुशौ पुष्करस्पृष्टस्वर्णमदाववरागमनयाश्लिष्टो भुजाग्रस्पृशा रत्ना
मोघ्यविघ्ननाशनया त्रिनयनं वंद्यार्थ चंद्रं जपाराके हस्तिमुखं स्मरामि सततं भोगातिलोलं विभुं। लक्षत्रयं
जपेन्मंत्रमिक्षुदंडैर्दशांशतः ग्रहस्थैः रजस्पृष्टकेवीजं हुयान्मंत्रसिद्धये स्वगुरुं धनधान्याद्यैः प्रीणयेत् प्रीत
मानसः स्वजामर्वेवदुद्दिष्टाततः काम्यानि साधयेत् हवास्पैविमधुकैर्वशयेद्भुविपार्थिवान् वत्थ्यौ
नारिकेलेन महतीं श्रियमश्नुते लवणैर्मधुसंयुक्तैर्वशयेद्वनिताजनं ॥ शक्त्याद्युद्धमिति स्वबीच्छ।
कपुटितं गणपतिबीजं वशमानयस्वरूपं द्धृदये स्वाहा करांगेयोनिर्धनाग्र लिंगाग्र मंत्रांतरमाह ॥
मंवर्नैर्नि त्रसंयुक्तः पार्थिवज्ञासनस्थितः प्रसादनायत्स्यन्मंत्रः स्वबीजाद्योदशाक्षरः गणकोमुनिरस्यस्या
द्विराट्छंदउदाहृतं लिप्रसादेनविघ्नोदेवनामन्नुदाहृता दीर्घयुक्तेनबीजेनषडंगानिप्रकल्पयेत्।
पाशांकुशौ कल्पमुद्रां विषाणं दधतस्वशुंडाहितनबीजपूरः रक्तस्त्रिनेत्रस्तरुणेंदुमौलिर्हारोज्वलो हस्ति

मुखोवताहः । लक्षंतन्मपेन्मनुपसंतोतेन्जुहुयाद्दशांशतस्तिलैः समधुत्रितयैर्द्विजैरथवाष्टभिरीरितैः प
कान्तरोदितपीठवक्ष्यमाणेनवर्त्मना पूजयेद्गणपंयथाविधि धूपदीपैर्गजाननं अंगानिपूर्वमावेष्ट्य विघ्ना
नष्टौयजेन्ततः विघ्नंविनायकंशूरंवीरंवरदसंज्ञकं एकवक्त्रंचैकरदंलंबोदरमनंतरं पश्चाद्ग्रेयजेन्म
ध्याङ्गाद्यास्तदनंतरं लोकपालांस्तदस्त्राणिविघ्नराजसमीरिता आज्याक्तैर्जुहुयात्तिलैर्मन्त्रवान्वा
स्तरागद्भवेत् पायसान्नेनमहतींश्रियमाप्नोतिमानवः आज्यहोमेनवशयेत्प्राणिनःसकलान्सुधीः ना
रिकेलफलंपक्वंलोष्टचर्मसमन्वितं जुहुयात्मनसहमंत्रीमंत्रसास्तिद्धिमाप्नुयात् जुहुयादष्टभिर्द्विजैर्मे
धुरत्रयसंयुतैः वशयेत्पार्थिवान्सर्वान्सन्मन्त्रीविधिनामुना दिनादिशुचनसूत्रवारिंशद्धारेणुभोदकैः त
र्पयेद्विघ्नराजस्यमस्तकेश्रीप्रसिद्धये । पाशांकुशौकल्पलतांस्वदंतेनकेरैवंहूंतेकनकाद्रिकांते सो
पानपेत्मादिननाथविश्वादायांतमंभोजगतंविचिंत्य । आगमकमस्त्रंसंप्रोक्तान्प्रयोगान्मनुनामुना
नैरस्मिन्नथवाप्रोक्तान्कुर्यान्मंत्रीविधानवित् ॥ संवर्तकःतकारः नेत्रयुक्तः इकारयुतःपाशः पा
कारः वह्न्यासनः रेफयुक्तः प्रकृतिर्भवति प्रसारनायस्वरूपं एतत् नमःगणपतिर्वीजाय लोष्टचर्म
समन्वितं कपालउपरितन्मुखाच्छादनसहितं दिनादिशुपतःएवंमंत्रोन्तस्मात् ॥ पंचांतकोविंदुयुतो
कर्ण वामैर्विभूषितः नारादिहृदयांतोयंहेरंभमंत्रीरितः चतुर्वर्णात्मकोन्देणांचतुर्वर्गफलप्रदः ष
ड्दीर्घभाजावीजेनषडंगानिप्रकल्पयेत् । मुक्ताकांचननीलकुंदघुसृणच्छायैस्त्रिनेत्रान्वितै नी
गास्यैर्हरिवाहनेशशिधरंहेरंभमर्कप्रभं दृप्तंदानमभीतिमोदकरदांटंकंशिरोक्षात्मिकांमालांमु
द्गरमंकुशंत्रिशिखकंदोर्भिर्दधानंभजे । लक्षत्रयंजपेन्मंत्रंदशांशंजुहुयात्तिलैः नीवारादिभि

शा. टी. नेपीठे देवं हेरंबमर्चयेत् ॥ पंचांतक इति गकारो बिंदुयुक्तः वामकर्णउकारः ततः शून्यरादिः प्र
ति. णवादिः हृदयांतो नमोंतस्त्वष्टवर्णात्मकः ष्रुस्टर्णऊरूमे नागास्येगजमुखैः मूर्धानमित्येणाव्ययः
९९ हविवाहने सिंहवाहने दानेवरदं टंकोङ्कुरः शिरोभिश्च ग्रथितं मालो त्रिशिखे त्रिशूले आसनमंत्रमुद्धरे
ति ॥ प्रणवः कवचं हंहं महासिंहाय गां ततः हेरंबेति पदं पश्चादासनाय हृदंततः अयमासनमंत्रः
स्यान्मूदध्यादस्यनासने नागादिविघ्नराजेनमूर्तिंतस्य प्रकल्पयेत् आवाह्यपूजयेत्तस्यामंगावरणसंयु
ते वाह्येलोकेश्वराः स्युश्चावज्राद्यैनिततः परं एवमभ्यर्चयेत्त्रिंसाधयेन्मनीषिणो मोदकैर्जुहुयात्
षष्ठामष्टमंगौकृतसैस्तथा चतुर्दशीदिने एवं जुहुयाद्दोद्धिकानामय पभिर्देवाः प्रजुहुयान्मेशीपर्वदिने
ष्ठ व साधयेत्सकलान्कामानयत्नेनैव साधकः ॥ प्रणवइति कवचं हंहं हेकारं हंहं महासनाय स्व
रूपं हेरम्बस्वरूप आसनायस्वरूपहृदविनः नमोविनः एष आसनमंत्रः यंत्रमुद्धरति ॥ अंभो
जे प्रथमं लिखेद्रसदलमध्ये सरोजांतरे साध्याख्यां बहिरंगमंत्रविलसत्किंजल्कसंशोभितं पत्राण
मुदरे विभज्य सनिशामालामनंशेषितान् षट्वर्णान्स्वरमे दले परिवृतं शक्त्याशकारेणतत् । रोचना
मदकाश्मीरैर्भूर्जपत्रे विलिख्य तत् वेष्टितं स्वर्णपट्टेन लोहैस्त्रिभिरनुक्रमात् धारयेद्धाहुनायंत्रं स
र्वकामानवाप्नुयात् ॥ अंभोजमिति अस्यार्थः प्रथमं षड्दलपद्मं कृत्वा तत्कर्णिकायां गणप
तिवीजमध्ये नाम विलिख्य केसरस्थाने षट्कोणे हृदयं शिरः शिखाकवचानि पूर्वं दक्षिणोत्तरे
षु अस्त्रं पश्चिमकेसरस्थाने नेत्र मित्येवं प्रकारेणांगमंत्रान्विलिख्य पूर्वादिषट्पत्रमध्ये यथाक्रमं
मालामंत्रवक्ष्यमाणं स्वनिशः समशो विभज्य लिखेत् पश्चाद्बहिः सकलागमभुवनेश्वरी वीजेन मकारे

66

एवं वेष्टयेत् स्वर्णरजतताम्रैर्वेष्टयेत् एतद्यंत्रमुत्तमफलप्रदं मालामंत्रमुदाहरति ॥ शक्तिं क्रौं एह्येहि भगवन्सर्वं खा
भुवांतेस्यान्त्यवीजं हृदयं ततः एह्येहि भगवन्सर्वं खादय स्तंभय द्वय सर्वविघ्नाधिपायोतेश्चैतं स- दय स्तंभय द्वयं
वार्थसिद्धिदं प्रवदेत्सर्वदुःखप्रशमनाय पदं ततः भुवनेशीस्यवीजं शांत्रतिः पावकवल्लभा पुनरे
क्रौंमायांतः पंचपंचदशाक्षरः मालामंत्रोयमत्युग्नान्त्ययोगान्साधयेत्सुधीः ॥ शक्तिः भुवनेशी
क्रौंशं प्रणवांतेवीजं गणवीजं हृदयं नमः सर्वविघ्नाधिपाय सर्वार्थसिद्धिदाय सर्वदुःखप्रश-
मनाय एह्येहि भगवन् सर्वं खादय २ स्तंभय २ भुवनेश्वरिं स्वाहा पुनरं क्रौंमायावीजं पंचपं
चपंचाशदक्षरः मंत्रोत्तरमाह ॥ ताराखंडस्वराः क्रमीनिः स्वरोणान्तरैरितः भुवनेनिः समवर्णाः
स्वब्रह्मण्यात्मको मन्त्रः वह्निवीजेन षड्दीर्घयुक्तेनांगक्रियामता । सिंहवाहनकांतिमिंदुवदनं ।
केसरहारादिभिर्दिव्याभरणैर्विभूषिततनुं स्वर्गस्यसौख्यप्रदं अभयं नामयशक्तिं क्रौं कूटयं वरकौ-
गरागोत्थकं स्वब्रह्मण्यं अगपाश्रहेरणमतोभीतिप्रणाशोद्यतं । लक्षमेकं जपेन्मंत्रं मासेन हवि
षा ततः दशांशं जुहुयाद्देवं ब्राह्मणानपि भोजयेत् धर्मादिकल्पितपीठे वह्निमंडलमध्यमे एज
येद्विधिना देवं स्वपवारैर्यथोचितैः केसरेषुंगपूजास्यान्प्रमध्यगतानिमान् जयंताख्यमग्निवेशं
कृत्तिकापुत्रसंस्कं अनंतरं भूतपतिं सेनान्यं गुहसंज्ञकं हेमचूलं विशालाख्यं शक्तिं शूलकरान्यजे
त् दिक्शूलाग्रेषु स्वांतरिदेवसेनापतिं पुनः विघ्नं मेघांततो वज्रकोणस्थो शक्तिं क्रौं कूटौ मयूरं द्विप
मध्यंद्यावासोलोकेस्वरान्पुनः धनाग्निनेषामंतेस्युः स्वब्रह्मण्यार्चनेरितः स्वाङ्गभिर्भेस्यभोस्याद्यैः
षष्ठांशं प्रोक्ष्य द्विजो एजयेद्देवता ब्याक्रमारान्ब्रह्मचारिणः संतानेविजयं वीर्यं रक्षामायुःश्रियंप

कुमारभुक्तौ पुनरात्महेतोः पयोधरौ पर्वतराजपुत्र्याः प्रक्षालयंतं करसीकरेण मौग्ध्यात्तु तेनाग ॥ मुखं भजामि ६

शा॰ टी॰ ति॰ ६७ शः प्रदध्यात्साधकस्याशु सम्यक् एषः स्मराचिंतः जपतर्पणहोमादौ विघ्नेशं सर्वसिद्धिदं प्रीणयेदना

यासेन सामान्ये सर्वसंपदा। ॐकारमाद्यं प्रवदंति संतो वाचः श्रुतीनामपि यं गृणंति गजाननं देवगणा

नतांघ्रिं भजेहमर्धेन्दुकृतावतंसं। पादारविंदार्चनतत्पराणां संसारदावानलभंगदक्षं निरंतरं निर्गत

दानतोयैस्तं नौमि विघ्नेश्वरमंबुदाभं। कृतांगरागं नवकुंकुमेन मत्तालिमालां मदपंकलग्नां निवारयंतं

67 निजकर्णतालैः को विस्मरेत्पुत्रमनंगशत्रोः। शंभोर्जटाजूटनिवासिगंगाजलं समादाय करांबुजेन ली

लाभिराराच्छिवमर्चयंतं गजाननं भक्तियुतो भवामि। यदा समुद्धूतगजास्यहस्ते ये शीकराः पुष्कररंध्र

मुक्ताः व्योमांगणे ते विचरंति ताराः कालात्मना मौक्तिकतुल्यभासः। क्रीडारते वारिनिधौ गजास्ये वेला

मतिक्रामति वारिपूरे कल्पावसानं परिचिंत्य देवाः कैलासनाथं श्रुतिभिः स्तुवंति। नागाननेनागकृतो

त्तरीये क्रीडारते देवकुमारसंघैः त्वयि क्षणं कालगतिं विहाय तौ प्रापतुः कंदुकतामिनेन्दू। मदोल्लस

न त्पंचमुखैरजस्रमध्यापयंतं सकलागमार्थान् देवानृषीन्भक्तजनैकमित्रं हेरंबमर्कारुणमाश्रयामि।

पादांबुजाभ्यामतिवामनाभ्यां कृतार्थयंतं कृपया धरित्रीं अकारणं कारणमाप्तवाचां तं नागवक्त्रं न

जहाति चेतः। येनार्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या तं चंद्रमौलेस्तनयं तपोभि

राराध्यमानंदघनं भजामि। पदं श्रुतीनामपदं स्तुतीनां लीलावतारं परमात्ममूर्तेः नागात्मको वा पुरु

षात्मको वा त्वभेद्यमाद्यं भज विघ्नराजं। पाशांकुशौ भग्नरदं त्वभीष्टं करैर्दधानं कररंध्रमुक्तैः मुक्ता

फलाभैः पृथुशीकरौघैः सिंचंतमंगं शिवयोर्भजामि। अनेकमेकं गजमेकदंतं चैतन्यरूपं जग

दादिबीजं ब्रह्मेति यं ब्रह्मविदो वदंति तं शंभुसूनुं शरणं भजामि। स्वांगस्थिताया निजवल्लभाया

स्त्रीवृन्दालोकनलोलनेत्रं स्मेराननाब्जं मदवैभवेन रुद्धं भजे विश्वविमोहनं तं । य एवमासाद्य
गजाननं त्वां सर्वाणि शास्त्राणि पठंति तेषां त्वत्तो न चान्यत्प्रतिपाद्यमेतैस्त्वदस्ति चेत्सर्वमसत्यकल्पं
हिरण्यगर्भं जगदीशितारं कविं पुराणं रविमंडलस्थं गजाननं ये प्रविशंति संतस्ते कालयोगैस्त्वम।
हं प्रपद्ये । वेदांतवेद्यं पुरुषं भजेऽहमात्मानमानंदघनं हृदिस्थं गजाननं यन्महसा जनानां विघ्नांधय।
कारो विलयं प्रयाति । शंभोः समालोकनजटाकलापे शशांकखंडं निजपुष्करेण स्वभग्नदंतं प्रविचिं
त्य सौम्यादाकृष्टकामः शिवमाननोतु । विघ्नार्गलानां विनिपातनार्थं यं नारिकेलैः कदलीफलाद्यैः
प्रतारयंतो मदवारणास्यं प्राप्नुवंत्यभीष्टमहं भजामि । यैस्तैरनेकैर्बहुभिस्तपोभिराराध्यमाद्यं गज।
राजवक्त्रं स्तुत्यानया ये विधिना स्तुवंति ते सर्वलक्ष्मीनिलया भवंति । इति श्रीशारदातिलके त्रयोद
शः पटलः १३ ॥ तारमिति तारः प्रणवः खड्गीश्वरः वकारः कूर्मः शकारः सनिः स्वरः केवल।
मंगनमात्रं तत्स्वकारः भुवनेतिस्वरूपं तत्र एतत्सिद्धं ॐ वशंभुवनमः ```` समस्ताकोमंत्रः शोभ।
निगद्य व्याख्यातम् इति श्रीशारदातिलकटीकायां त्रयोदशः पटलः १३ ॐ गणपतिमंत्रकथनानं
तरं वंद्यमंत्रवक्तुमारभते ॥ अथोच्यते वंद्यमंत्रोऽमनुः सर्वसमृद्धिदः खड्गीशास्योभृगुर्विंदुमनुस्वा
स रसमन्वितः सोमाय हृदयांतोयं मंत्रः प्रोक्तः षडक्षरः ऋषिरुक्तोऽभृगुश्छंदः पंक्तिः सोमोऽस्य देवता दी
र्घभाजां तु वीजेन मनोरंगक्रियामता । कर्पूरस्फटिकावदातमनिशं पूर्णेंदुविंबाननं मुक्तादामवि
भूषितेन वपुषा निर्मूलयंतं तमः हस्ताभ्यां कुमुदं वरं च दधतं नीलालकोद्भासितं स्वस्यांकस्थमृगो
दिताश्रयगुणं सोमं सुधाब्धिं भजे । रसलक्षं जपेन्मंत्रं साधको विजितेंद्रियः तत्सहस्रं प्रजुहुयात्पा।

मा

शा॰ दा॰ यसेन ससर्पिषा सोमं तं स्वर्जिते पीठे पूजयेद्रोहिणीपतिं अंगानि केसरेष्वस्य स्त्वं देव्यः पत्रमध्यगाः रोहि
ति॰ णी कृत्तिका भूयो रेवती भरणी पुनः रात्रिरार्द्रा ततो ज्योत्स्ना कला हारसमप्रभाः सितांबरधराश्चक्का
५८ हारविभूषणाः पयोधरभराक्रांता रचितांजलयः शुभाः वहुभानसमानसोमदविभ्रमसंकुला समम
ध्यः सरोजास्यः वेंदुविंवनिभानना आदित्यमंगलबुधमंदवाक्पतिराहवः शुक्रकेतुयुताः पूज्याद्दला
68 ग्रेष्वग्रहाष्टमी स्वस्ववर्णाविरोपेताः स्वनामाद्यर्णबीजकाः रक्तारुणश्वेतनीलपीतश्यामसितासिताः वा
मोरुन्यस्तहस्ताश्च दक्षिणेनाभयाभया अंबुजापाकरो भानुर्दंष्ट्राभीमस्तथा शनिः राहुर्विकृतवक्त्रः स्या
त्केतुः स्याद्रचितांजलिः लोकपालास्ततः पूज्या वज्राद्यैश्च सह क्रमात् एवं सिद्धमन्त्रे मंत्री संपदवसन्निभे वे
न् चंद्रेश्वरीकमध्यस्थं नारहारविभूषणं तारापतिं स्मरन्मंत्री त्रिसहस्रं समं जपेत् राज्यं धान्यं दरिद्रोऽपि प्रा
प्नुयाद्धस्तगतं नरः एवं कर्कसंक्रमेप्रेक्ष्य शशिनं भूमि चिंतयेत् रोगापमृत्युदुःखानि जित्वा वर्षशतं वसेत्
ब्रह्मचर्यरतः शुद्धः स्थले लक्षमिदं जपेत् निपाने भुगते मघः शाम्भुयाद्यत्नवर्जितः जितेंद्रियो जपेन्मंत्रं पू
र्णमास्यां विशेषतः भवेत्सौभाग्यनिलयः संपदां परमो निधिः ग्रहोत्थानि रोगाननभिचारत्रुपद्रवान्
विद्विषामपि संघातं नाशयेन्मन्त्रनायकः पौर्णमास्यां निराहारो दद्यादर्घ्यं विधूदये ॥ अस्येति मंत्र
द्वयति एवं द्वीपाः वकारः भृगुः सकारः विंदुरनुस्वारः मनुवरः औकारः ततश्चनिस्त्रो इति सिद्धं अस्ये
त्वन्यथाहरंति सौ इति प्रवाममेवं संप्रदायिकः सोमाय स्वरूपं हृदयांतो नमोंतः पषषडक्षरो सोममंत्रः
समलतं षट्लंतं पौर्णमास्यामिमरः प्रोक्तमेतेषु यः स्पष्टार्थः अर्घ्यदानप्रकारमेवाह ॥ प्राक्स्ना
नगायत्रेऽर्घ्याङ्गुलमंडलत्रयं निधाय पश्चिमे मंत्री मंडले विहितासने मध्यस्थं स्थापयेत्पात्रं

इत्याराधनशेषतः अथास्मिन्मंडले सोममर्चयित्वा तु जानिते गजन्तेचषकंभद्रस्यापयेन्नरतः स्वयी
गोत्रयेनसमाहर्यस्पृष्ट्वा तं पूजयेन्मंत्रं अष्टोत्तरशतं पश्चाद्विद्यामंत्रेण देशिकः दद्याद्दक्षिणशाकाय
सर्वकामार्थसिद्धये अनेन विधिना कुर्वन्प्रतिमासमतंद्रितः षण्मासाभ्यंतरे सिद्धिं साधकेंद्रः समश्नुते
श्रियासमन्वितात्वान्सौभाग्यं विपुलं यशः कन्यामिष्टामवाप्नोति कन्यापि वरमीप्सितं बहुनाकिमिहो
क्तेन सर्वं दद्यात्रिशापतिः ॥ प्राकप्रागमिति चषकमर्घ्यपात्रे विद्यामंत्रमेवोद्धरति ॥ विद्ये विद्या
मालिनि स्वाचंद्रिण्येतेततो भवेत् पुनश्चंद्रपुटि विस्वाहा विद्यामंत्र उदाहृतः ॥ चंद्रिणि चंद्रमुखे
स्वाहा मंत्रः अष्टोत्तरं स्वर्यमंत्रमुद्धरति ॥ तारो रुद्रेणाभ्युतः पश्चाद्वामकर्णविभूषितः वह्न्यास
नो मरुच्छेषः सनेत्रो विसर्गपश्चिमः अष्टात्तरो मनुः प्रोक्तो मातुरभिमतप्रदः देवभागो मनुः प्रोक्तो गा
यत्रीछंद ईरितं आदित्यो देवता प्रोक्तो दृष्टादृष्टफलप्रदः ॥ तारः प्रणवः रुद्रेणा स्वरूपेण युतः।
सकारः कामवर्णः ह्रकारश्चतः वह्न्यासनो मरुत् रेफसहितः यकारः ततः वहतिसिद्ध शेषः
अनंतरं मकारः सनेत्रः उकारसहितः अत्रिः दकारः ततोदि इतिभवति ```` मकारानंतरायेम
षड्गमंत्रानुद्धरति ॥ सत्याय हृदयं प्रोक्तं ब्रह्मणे शिर ईरितं विष्णवे स्याच्छिखा वर्म रुद्राय परिकी यं
र्तितं अमये नेत्रमाख्यातं शर्वायास्त्रमुदाहृतं तेजोज्वलमणिक्रंफट्हितांताः इत्थमीरिताः अंग
मंत्राः पुनर्न्यसेत्समवमूर्तीर्यथाक्रमं आदित्यं विन्यसेन्मूर्ध्नि रविं मुखे गले न्यसेत् हृदये भानुमाख्यातं
भास्करं गुह्यदेशतः सूर्यं चरणयोर्न्यसेत्सह तैः सत्यादिपंचभिः प्रधानमूर्तिप्रतिमाः सर्वाभरण
भूषिताः मूर्धास्यकंठहृदयक्रतिनाभिधजौत्रिषु मंत्रवर्णाञ्न्यसेदष्टौ प्रत्येकं प्रणवादिकान् एवं

शा. ता.
ति.
६९

न्यस्तशरीरोसौ चिंतयेत्तेजसां निधिं । रक्ताब्जयुग्माभयदानहस्तं केयूरहारांगदकुंडलाढ्यं माणि-
क्यमौलिं दिननाथमीडे बंधूककांतिं विलसत्त्रिनेत्रं । वसुलक्षं जपेन्मंत्रं ससिद्धिः सौरशास्त्रवि-
त्तत्सहस्रं प्रजुहुयात्सौराब्जैरभिजितेंद्रियः पीठसंज्ञके प्रथमं दिक्षु मध्ये च संयजेत् प्रभूतं विम-
लं सारं समाराध्यमनंतरं परमादिसुखं पीठं स्वबिंबांतं प्रकल्पयेत् दीप्ता सूक्ष्मा जया भद्रा विभूतिर्वि-
मला पुनः अमोघा विद्युता सर्वतोमुखी पीठशक्तयः ॥ ततस्त्वसमायाः तेजोज्वालामणिं हुं फट् स्वा-
हा हृदयाय नमः ब्रह्मणे तेजोज्वालामणिं हुं फट् स्वाहा शिरसे इत्यादि सर्ववत् षडंगन्यासः अं-
गमंत्रा ईरिताः इत्यत्र नेन संबंधः हृस्वैरित्यादि सत्यादिपंचभिः ओं पं उं रं ग्रं प्रभृतिभिरित्यर्थः पीठ-
स्त्रावसरे यमीदृशं तां .... प्रागेवोक्तस्थाने सुप्रभूतादीन्संसृज्य पश्चाद्धर्मादिसंज्ञेति तत्रेयं पीठशक्त-
यः प्रदर्श्यंते ॥ दीप्तदीपशिखाकारबीजात्मानः संविदुः क्रमात् अक्लीबहृस्वत्रितयस्वरान्विंदुमि-
श्रितान् ॥ नपुंसकचतुष्टयं ऋ ॠ ऌ ॡ तद्व्यतिरिक्तस्वरान् अं ईं ऊं एं ऐं ओं औः इत्येतान्स्वरान् अमा
शक्तीनेवीजत्वेन विदुः जानंति देशिकाः पीठमंत्रमुद्धरति ॥ वेदत्वं वचनं ध्यांते ब्रह्मविष्णुशि-
वात्मकं सौराय योगपीठाय नमः पदमनंतरं पीठमंत्रोयमाख्यातो दिनेशस्य जगत्पतेः नारादि-
कं खखोल्काय नमः स्वमूर्तिकल्पना सावित्रीसर्वलोकानां तस्यामावाह्य पूजयेत् अंगानि पूजये-
द्दावेदिक्षु केसरेष्वर्कमूर्तयः आदित्याद्याश्च तत्प्रोक्ताः शक्तयः कोणपत्रगाः स्वस्वनामादिवर्णाः सुस-
संबीजान्नमोन्तक्रमात् उषा प्रभा प्रज्ञा संध्या शक्तयः परिकीर्तिताः पत्राग्रेषु [illegible] वरुणाम
र्चयेत् वज्रादीन्पूजयेत्पश्चात् [illegible] ततो वहिः इंद्रादयस्तदस्त्राणि यथार्हं समर्चयेत् एवं संसृज्य

विधिवद्भास्करं भक्तवत्सलं दद्यादर्घ्यं प्रतिदिनं वारे वा नस्यवोदिते प्रभाते मंडले कृत्वाष्टदलं पीठ
मर्चयेत् पत्रं ताम्रमयं प्रोक्तं तोयपात्रं हि मनोरमं विधाय तत्र मन्त्रेणापूरयेत्तु शुभोदकैः कुंकुमं रोचना
रागैरक्तचंदनैर्वेणवान् करवीरजपाशालीकुशश्यामाकतंदुलान् निक्षिपेत्सलिले तस्मिंस्तत्रैकं सं
कल्प्य भानुना सांगमर्चयेत्तस्मिन्भास्करं प्रोक्तलक्षणं गंधपुष्पादिभिर्वैद्यैर्यथाविधिविधानवित्
तत्पिधाय जपेन्मंत्रं सम्यगष्टोत्तरं शतं पुनः संपूज्य गंधाद्यैर्जानुभ्यामवनीं गतः आमस्तकं तदुद्धृत्य
मोत्रिमावरणे रवौ दृष्टिं विधाय सैकेन मूलमंत्रपियाजमन् दद्यादर्घ्यं दिनेशाय प्रसन्नेनांतरा
त्मना कृत्वा पुष्पांजलिं शेषां जपेदष्टोत्तरं शतं यावदर्घ्यामृतं भानुः समादत्ते निजैः करैः तेन तत्स्मो दि
नमणिर्दद्यात्तस्मै मनोरथान् अर्घ्यदानमिदं पुंसामायुरारोग्यवर्द्धनं धनधान्यपशुक्षेत्रपुत्रमित्रक।
लत्रदं तेजोवीर्ययशःकांतिविद्याविभववाक्प्रदं ॥ वेदादितिचतुर्थ्यंतः ब्रह्मविष्णुशिवात्मकायसौ
राययोगपीठायनमः स्वरूपं अर्घ्यदानप्रकारमाह ॥ आकाशमग्निदीर्घेंदुसंयुतं भुवनेश्वरी सर्ग
न्वितो भृगुर्भानोस्मृतो मन्त्रीरितः आधाराद्वियदाग्रांतं कंठादाधारकावधि मूर्धादिकंठपर्यंतं म
क्रमाद्बीजत्रयं न्यसेत् षड्दीर्घस्वरयुक्तेन मध्येनांगानि कल्पयेत्। रक्तांबुजासनमशेषगुणैकसिं
धुं भानुं समस्तजगतामधिपं भजामि पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणांगरु।
चिं त्रिनेत्रं । ध्यात्वा लक्षं जपेन्मंत्रमाज्येन दशांशतः तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेंद्रियः एवं
केऽर्कजयेत्पीठे विधानेनामुना रविं प्रथमावृतिरंगैः स्यात्सोमाचंद्रादिभिर्ग्रहैः तृतीया लोकपालैःस्यात्स्व
नर्थीस्यानदाद्यैः इति संपूज्य निर्माल्यं तेजश्चण्डाय दापयेत् अर्घ्यं प्रागीरितं दद्याद्ध्यानं वै संयतेंद्रियः

शा॰ दा॰ ति॰ ८०

सोपि रत्नैः पवनेयान्मंत्रपीठान्यशः पश्चात् वस्त्राणि भूषणादीनि दद्यात्तस्मैन संशयः ॥ आकाशमि
ति आकाशः हकारः अग्निः रेफः दीर्घः आकारः इंदुः बिंदुः एतैः संपिंडितं प्रथमाक्षरं ह्रां इति भवति
भुवनेश्वरीबीजं द्वितीयं सर्गान्वितः भृगुः स इति तृतीयाक्षरं एवं त्र्यक्षरात्मको मन्त्रः स्पष्टार्थमपरम्
मंत्रान्तरमाह ॥ आकाशमग्निपवनसंयुतं नादीर्घबिंदुमत् मार्तंडभैरवेनाम बीजमेतदुदाहृतं ॥

70

आकाशं हकारः अग्निरेफः पवनो यकारः संयुतः आकारः अर्धीशः ऊकारः बिंदुरनुस्वारः एतैः
संपिंडितो मार्तंडभैरवनामा एकाक्षरो मंत्रः तत्त्वस्य ह्र्यूं इति सिद्धम् एतदेव बीजं बिंबबीजप्रदितं
सर्वकामार्थदमित्याह ॥ प्रदितं बिंबबीजेन सर्वकामफलप्रदं दांतेदहननेत्रेंदुसहितं तदुदीरि
तं ॥ बिंबबीजमुद्धरति दांतमिति दांतो पकारः दहनो रेफः नेत्रमुकारः इंदु बिंदुः एतैः संपिंडि
तं प्रुं इति भवति ॥ एवं कृत्वा बीजेन पंचमूर्तीः प्रविन्यसेत् मध्यमादिकनिष्ठांतमंगुलीषु क्रमादि
माः ॥ अस्यार्थः प्रत्येकं संपुटितेन मूलबीजेनेति वक्ष्यमाणस्थानेषु न्यसेत् मूर्तीर्दर्शयति ॥
सूर्यो व्योमा भास्करो भानुतनोरविर्दिवाकरौ शिरोवदनहृत्पाददेशेषु ताः पुनः ॥ अंगन्यासमाह ॥
दीर्घयुक्तेन बीजेन नेत्रांतांगानि विन्यसेत् व्यापकं मूलबीजेन कुर्वीत तदनंतरं ॥ ह्रां ह्रीं इत्यादि प्र
कारेण बीजेन ध्रां ध्रीं इति वा न्यासः ॥ ध्यानमाह । हेमांभोजप्रवालप्रतिमनिजरुचिं चारुखट्वांग
पद्मौ चक्रं पाशं सृणिमत्रितिविशा मत्तमालाकपालं हस्तांभोजैर्दधानं त्रिनयनविलसद्देववक्त्रा
ठप भिरामं मार्तंडवल्लभार्यं मणिमयमुकुटहाररक्तं भजामः । लक्षत्रयं जपेन्मंत्री बीजेबिंबप्रदीक्षितं
दशांशं कमलैर्जुहुयान्मधुरोक्तैः पीठे दीप्तादिभिर्युक्ते कर्णिकायां मघादिकः पूर्वादिदिक्ष

संश्लस्य मूर्तिं मूलेन कल्पयेत् आवाहय्य यजेद्देवं वक्ष्यमाणविधानतः सूर्यादीशान्तगो दिक्षु विदिक्षु
संप्रकल्पयेत् अंगान्यजाय यथा पूर्वं नेत्रमीशानदिग्गते ग्रहानष्टौ ततो बाह्ये लोकपालांस्ततः परं अ
स्त्राणि च यजेन्मंत्री मार्तण्डभैरवं इति सिद्धिमनुर्मंत्री साधयेदिष्टमात्मनः शालात्यतिलविल्वानां
लक्षहोमात्त्रिधिर्भवेत् राजवृक्षसमुद्भूतैः पुष्पैर्होमो रमाकरः जपाकुसुमहोमेन वश्यायत्तविराड्।
पान् मातुलुंगफलैर्हुत्वा धनमिष्टं लभेन्नरः इदं मंत्रं जपन्मर्त्यः कीर्तिं प्रज्ञां बलं द्युतिं वाक्सिद्धिममि
तां लक्ष्मीं सौभाग्यमपि साधयेत् ॥ खद्योतं गगनस्थं भानोस्त्रिप्रसिद्धं खद्योतमेवं परे सूरयः अंकुशः
वेदवह्निवर्णक्रमाद्देवं दिवाकरमंत्रमाह ॥ वियदर्धेन्दुललितं तदादि सर्गसंयुतः अजपा व्योम
त्रुः शोकोऽष्टाक्षरः स्वरपादपः ऋषिर्ब्रह्मास्य नो देवी गायत्री छंद ईरितं देवता जगतामादिः संप्रोक्तो गि
रिजापतिः ह्रस्वाद्यड्दीर्घयुक्तेन कुर्यादंगक्रियां मनोः । उद्यद्भानुस्फुरिततडिदाकारमर्धाम्बिकेशं पा
शाभीतिवरदपरशून्संदधानं कराब्जैः दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूले सौम्याग्नेयं वपुर
वतु वश्चंद्रचूडं त्रिनेत्रं । भानुलक्षं जपेन्मंत्रं पायसेन ससर्पिषा दशांशं जुहुयात्सम्यक् ततः सिद्धो भ
वेन्मनुः दीप्तादिशक्तियुते पीठे प्रागुक्ते पूजयेद्विभुं मूलेन मूर्तिं संकल्प्य यजेदंगादिभिः सह हरंतु वसुन
रवैरादिदलेषु विदिक्षु च अर्चयेत्तु नागाञ्जनामग्न्याद्यान्महिमाहिन् पुनः लोकेशांस्तदस्त्राणि पूजयेद्देव
मन्वहं अर्घ्यं च विधिवद्दद्यात्प्रागुक्तेनैव वर्त्मना मंत्राप्तमात्राम्भोजे धृतं कुंभे निधायते पिधायवा
मदृस्तेन न्यस्तमंत्रेण संयुतः अष्टोत्तरशतं मंत्रं जपेत्तोयं सुधामयं स्नात्वा तेनाभिषिंचेद्यः स भवेद्वि
गामयः अमृतारोग्यविभवान्मितं लभते नरः अनेनैव विधानेन विषार्तो निर्विषो भवेत् ॥ विंदुः

ता

प्र॰ सा॰
वि॰
७८

ष्मां विगलन्त्या यापरिप्लुते मंत्रात्मवीजे ततः प्रद्योतस्मरमामृतेन शशिना संसिक्तमाद्यं स्मरन् मंत्री मंत्र
मिमं जपेद्विषगदोन्मादापमृत्युज्वराग्नितापविषशत्रुविजिघांसुविभवो जीवेत्समं बंधुभिः ॥ वियदिति हका
रः अर्धेंदुरनुस्वारः ततो हमिति सिद्धं तदादिः सकारः विसर्गसहितः ततो हंसः इति सिद्धं हंसकारयु
क्तेन सकारेण नादेशेन षडंगानि कुर्यात् इत्यर्थः अष्टदलपद्मे लिखित्वा दिग्दलेषु क्रमेण हृदयाय न
मः वसवे नमः नराय नमः वराय नम इति पूजयेत् मंत्राद्यमातृकाख्ये पद्मे विलिख्य तत्कर्णिकायां
हंसमंत्रं लिखेत् मंत्रं भविंदुभ्यामिति योगप्रकारं सफलं निरूपयति हंसः इत्यत्र विंदुभ्यां विगलद्भ्यां
स्नुधापारिमितं परिमितं मंत्रात्मवीजं सहस्रपत्रं संचिन्त्य ततस्तस्मात्सकारात्तरात् प्रद्योतस्मरमामृते
इ शशिना अमृतमयपरिप्लुतविंदुना संमिश्रमाद्यं हकारान्तरमेव विलोमेन संस्मरन् जपतः फल
माह । मंत्रीति इदानीमग्निमंत्रमुद्धरति ॥ वाह्नित्रयमग्निः स्याज्जातवेदः इहावह सर्वकर्माणि सा
धय साधयाग्निप्रियांततः नाराद्योयमंत्रः प्रोक्तः पंचविंशतिवर्णवान् ऋषिर्भृगुर्भवेच्छंदो गायत्रं देव
तानलः विभक्तैः पंचभिः षड्भिः चतुर्भिः पंचभिस्त्रिभिः द्वाभ्यामंगक्रिया प्रोक्ता वर्णैर्मूलमनुः क्रमात् ॥
उद्धारः स्पष्टः नाराद्यः पंचविंशत्यक्षरोग्निमंत्रः ॥ ध्यानमाह । अर्कस्पाससकं स्वर्णमालमरुणस्रक्चंद
नालंकृतं ज्वालापिंगजटाकलापविलसन्मौलिं स्रुक्स्रुवाकरं शक्तिस्वस्तिकदर्भमुष्टिकजपस्रक्क
वाभीवरान् दोर्भिर्विभ्रतमर्चितं त्रिनयनं रक्ताभमग्निं भजे । गुरोर्लब्ध्वा मंत्रं मंत्री चतुर्दशपाशुपोषितः ज
पेल्लक्षसहस्राणि शुद्धाचारो जितेंद्रियः अमावस्यादिने विप्रान्भोजयेन्मधुरोत्तरैः मत्स्यैर्मांसैर्यथाश
क्ति दद्यात्तेभ्यो दक्षिणां भक्त्या स्वयं समानीय होमद्रव्याणि शोधयेत् अपरेदिनमारभ्य होमं कुर्यादतंद्रितः

क्रमाद्धुतसमिद्व्रीहितिलाज्यैर्हविष्टकैः प्रत्येकमष्टोत्तरशतं जुहुयाद्दिनशः सुधीः दशाहमेवं निर्व
र्त्य विधानेन विधानवित् दत्वा पूर्णाहुतिं सम्यगेकादश्यां द्विजोत्तमान् संभोज्य तर्पयेद्दिने यथाविभव
मादरात् गुरवे दक्षिणां दद्यात् करुणां गां पयस्विनीं वासांसि धनधान्यानि दत्वा संप्रीणयेद्गुरुं स्वमंडला
न्तः प्रजपेत्सप्तलीहेमनवशक्तिकं पीतश्वेतारुणा कृष्णा धूम्रा नीला स्फुलिंगिनी रुचिरा ज्वालिनी प्रोक्ताः कृ
शानोर्नवशक्तयः स्वबीजेनासनं दद्यान्मूर्तिं मूलेन कल्पयेत् अथ संपूजयेद्वह्निं विधिना प्रोक्तलक्षणे
अंगपूजा परा प्रोक्ता मूर्तीरष्टौ दलेष्विमाः जातवेदः सप्तजिह्वा हव्यवाहनसंज्ञकः अश्वोदरजसंज्ञो न्यः
पुनर्वैश्वानराह्वयः कौमारतेजः स्याद्विश्वमुखो देवमुखः परः अर्च्याः स्वस्तिकशक्तिभ्यां विराजितकरां
बुजाः लोकेशानर्चयेद्बाह्ये वज्राद्यायुधसंयुतान् इति संपूज्य पित्रिं संजपेन्मन्त्रं सहस्रकं जायते वत्सराद्दे
वधनधान्यसमृद्धिमान् साध्यमन्त्रं प्रजप्य जुहुयाद्वत्सराल्लभते श्रियं कुसुमैर्बिल्वसंभूतैस्तत्संदधितैर्द्युतैरन्
ते करवीरप्रसूनैर्वा मंडलात्स्याद्धनसमृद्धिमान् षण्मासात्कपिलासर्पिषा जुहुयाद्वत्सरान्तरे तस्य संजायते ल
क्ष्मीर्लक्ष्मीस्सैलोक्यवेदिता शालिभिर्जुहुयान्नित्यं विधिनाष्टोत्तरशतं व्रीहिगोमहिषद्राद्यैर्धनैर्नृतस्य वर्ध्य
ते तिलहोमेन महतीं श्रियमाप्नोति मानवः पलाशबिल्वखदिरशमीदूर्वामहीरुहान् विकंकतार
ग्वधयोः समिद्भिः करवीरजैः प्रसूनैः कुमुदैः पद्मैः कल्हारैररुणोत्पलैः जातीप्रसूनैर्दूर्वाभिर्नित्यमष्टोत्त
रशतं पृथक् जुहुयान्मन्त्री प्रतिपत्प्रथवाः सुधीः साधयेदखिलान्कामान्षण्मासान्नात्र संशयः ॥ँ मा अंगे साधकोत्तिं
तृलक्षाणि षोडशलक्षाणि अपरेदिने प्रतिपदं इतरेऽग्रेऽथः स्युः स्वमंडलान्तमग्निमंडलान्ते स्वबी
जेन अग्निबीजेन रेफेण निगदव्याख्यानमपरम् मंत्रान्तरमाह ॥ ॐ तिष्ठ पुरुष हूयाद्धरिपिंगल

अ ख्यादयःश्रयाप्रोक्ताः षट्भूतकरणेपश्चिमि : १

शा. ति.
७२
72

तस्यैरं लोहितान्तपदं देहिमे ददापय ठद्वयं वन्हिविंशत्यक्षरात्मा समृद्धिमन्त्र ईरितः वन्हिभिर्युगलैर्ना
र्णैर्मूलमंत्रसमुद्भवैः विदधीत षडंगानि जातियुक्तानि मंत्रवित् । स्वर्णाभश्वेतनिर्मितं हृतवरं हंसिद्धर
पुंजप्रभं ज्वालाभिर्निचितांगरोमनिचयं कान्त्या जगन्मोहनं अश्वाकारमनर्घ्यरत्नविलसद्भूपालसत्के
यूरं रत्नैरिंद्रियनिर्गतैर्वसुमतीमाच्छादयंतं स्मरेत् । लक्षमन्त्रं जपेदेनं पयोन्नेन समर्पिषा दशांश
ञ्जुहुयाद्धोमेऽरगाग्निमंत्रं स्मरन् पीठे शाग्नीरितेभ्यर्च्य तदंगैर्मूर्तिभिः सह आशापालैस्तदीयास्त्रैरभ्य
र्चेदश्ववाहनं प्रातःस्नानरतो मंत्री सहस्रं यो जपेन्मनुं जित्वा रोगान्स जीवेत श्रियावर्षशतं नरः सत्यमा
र्णे जले स्थित्वा भानुमालोकसंयुतः वत्सरः सहस्रं प्रजपेन्नित्यं संवत्सराविधि अपमृत्युभयं रोगान्कृत्यादारि
द्रसंभवान् क्लेशान्विनिर्जित्य तेजस्वी जीवेद्वर्षशतं सुधीः कृत्तिकायां प्रतिपदि स्थालीहोमो यमप्रदः द
भाशमीसमिद्भिर्वा प्रतिपत्सु भवेद्धुतं रत्नवान्निर्भवेदास्यैः पयो ग्रामं सवाम्रयात् तैलसंसिक्तिषनीघृ
तैरिष्टराष्ट्रं जयेन्नृपः अश्वत्थसमिधो मेषीघृताक्ता जुहुयान्नरः कन्यामिष्टामवाप्नोति सा पतिं प्राप्नुयाद
रं स्वदासेन कृतो होमो ज्वरनाशकरः परः समारं जुहुयान्मंत्री वेश्यकन्यास्तु मे शुभैः साज्यैः सहस्रमचिरान्म
हतीं श्रियमाप्नुयात् मासं क्षीरेण गव्येन क्षीराहारो जितेन्द्रियः सहस्रं जुहुयान्मंत्री संपदामधिपो भ
वेत् आरग्वधहवी होमेन जीवेद्वर्षशतं नरः अष्टोत्तरशतं नित्यं हविषा मृतमुद्रया जुहुतो जायते ल
क्ष्मीर्धनधान्यसमृद्धिदा प्रतिमासं प्रतिपदि जुहुयाद्युते हुतैः श्रीर्भवेन्महती तस्य षण्मासादनपायि
नी अरुणैः कमलैः फुल्लैर्मधुरत्रयसंयुतैः जुहुयाद्वत्सरार्धं यः स भवेदिंदिरापतिः अरुणाब्जैस्त्रिमधु
रैर्जुहुयाद्वत्सरं सुधीः सहस्रं वत्सरार्धेन भवेद्भूमिपुरंदरः वत्सरं जुहुतस्तस्य सा लक्ष्मीरिंद्रेण वांछिता

जुहुयाद्दग्धतालेवैडैः पयोक्तैः समवासरे त्रिमधूक्तं प्रतिदिनं मंत्रविद्विजितेन्द्रियः कृत्वाद्रोहस्थ्वरोन्मादरो
गान्जित्वा निरंतरं जीवेद्वर्षशतं भूत्वा तेजसा भास्करप्रभा करवीरजपापुष्पपलाशान्दधभूरुहान् प्रसूनैः
कुसुमैः कुलेकुरैदैर्जातिसंभवैः पुष्पैर्हुत्वा त्रिमधाक्तैर्मंत्री प्रतिपदं प्रति आप्नुयान्महतीं लक्ष्मीं वत्सरा
द्दाक्षिताधिका प्रादायतेऽलप्रस्थं निर्मलं साधु शोधितं गोदुग्धेन हविः कृत्वा केवलेन तेन कल्पयेत् आ।
ज्याक्तेन तन्मात्राय पञ्जिते हव्यवाहने गंधपुष्पादिभिः सम्यक् प्रपिवाष्टोत्तरशतं जुहुयात्प्रतिपद्यग्निं ध्या
त्वा तत्र गविग्रहं नाप्नुयेत् वत्सरादर्वाग् लक्ष्मीं त्रैलोक्यमोहिनी मंत्रेणानेन संजप्तं वर्चा वाटे दिनागमे भा
रती निवसेत्तस्य मुखांभोजे सुनिश्चला अष्टोत्तरशतं जप्तं जलं प्रातः पिबेन्नरः जठराग्निर्ज्वलेत्तस्य ह
तेनैव हुताशनः कृत्वा नवपदान्माने मंडले प्राग्धीविते कलशान्नवकल्याणान्स्थापयेत्पाकवर्त्मना
त्तीरवृक्षत्वगुत्थैः क्वाथैः स्नात्वा पूरयेत्क्रमात् वस्त्रादिभिरलंकृत्य नवरत्नानि निक्षिपेत् मध्ये संपूजये
दग्निंमूर्तीरष्टौ दिशां क्रमात् कुंभेषु गंधपुष्पाद्यैर्धूपदीपैर्मनोहरैः स्पृष्ट्वा जपेन्नरः कुंभं मंत्रमष्टोत्तरं।
शतं अभिषिंचेत्ततः साध्यं विनीतं दत्तदक्षिणं ज्वरग्रहमहारोगदारिद्र्याशौचविनिर्मुक्तः जीवेद्वर्षशतं
सम्यगभिषिक्तः श्रियासह ॥ इति श्रीशारदातिलके सूर्यवेदाग्निमंत्रकथनं नाम चतुर्दशः पटलः १४
अथ वक्ष्ये महामंत्रान्निस्मृतः सर्वार्थसाधकान् यस्य संस्मरणान्मर्त्यो भवाब्धेः पारमाप्नुयात् तारे नमः प
दं स्याद्भगवते दीर्घसमन्वितौ पवनो णाय मंत्रोऽयं प्रोक्तो वस्वक्षरान्वितः साध्यो नारायणः प्रोक्तो मुनिश्छं
दउदाहृतं मंत्रस्य देवी गायत्री देवता विश्वरूपयः क्रुद्धोल्काय हृदाख्यातं महोल्काय शिरः स्मृतं वी
रोल्काय शिखा प्रोक्ता द्युल्काय कवचं स्मृतं सहस्रोल्काय अस्त्रं क्रमं गजभिरिये मनाः भूयाद्वर्णैर्म।

पा॰ द्वा॰ ति॰ ७३ पृ॰

73

नेः षड्भिः षडंगानि समाचरेत् अवशिष्टैः पुनर्वर्णैर्विन्यसेत्कलितः हृदयोः अष्टादिकमंत्रेण मंत्रवर्णान्
स्तनौ न्यसेत् आधारे हृदये वक्त्रे दोर्मूले पुनासिके कंठनाभौ हृदि कुक्षौ पार्श्वे पृष्ठे पुनस्तथा मूर्धास्थाने
च श्रवणे प्राणे षान्तदनंतरं दोर्मूले संधि अंगुलेषु यान् प्राणेषु हृदि मूर्धान्तमाख्यातकं वीसोहं ज्ञेयाप
दहये पृष्ठे कुक्षौ न्यसेद्दन्ताग्रे शोभापदेषु च वक्त्रे शंखगदांभोजपद्मे वर्हितो न्यसेत् अष्टार्णेष्टाक्ष
स्यान्मात्रेयैश्चापि आत्मना संयोगान्मतिरिभिः प्रोक्तो विशिष्टो द्वादशाक्षरः अतस्तन्मंत्रवर्णाय द्वादशाक्षर
संयुताः द्वादशादिन्यसहिता मूर्तीर्द्वादश विन्यसेत् केशवाद्यः क्रमाद्देवः स्वमाणविधानतः ललाटे।
केशवं धात्वाकृत्तो नारायणं पुनः अर्यम्णा हृदि मित्रेण माधवं कंठदेशतः वरुणेन च गोविंदं पुनर्दक्षिण
पार्श्वके अंशुर्नविष्णुं संस्थं भगेन मधुसूदनं गले विवस्वता पृष्ठे त्रिविक्रमं अनंतरं वामपार्श्वस्थं मित्रे
ण वामनाख्यं मंत्रांसके इन्द्रा श्रीधरनामानं गले पर्जन्य संयुतं हृषीकेशाद्यं पृष्ठे पद्मनाभं ततः परं
दामोदरं पश्चाद्दिष्टनाकरादिन्यसेत् द्वादशार्णमहामंत्रेण तेनामूर्द्धि प्रविन्यसेत् पुनः किरीटमंत्रेण व्या
पकं विन्यसेत्ततः अथ किरीटकेयूरहारमकरकुंडले चक्रशंखगदांभोजहस्तं पीतांबरधरं श्रीवत्सां
कितवक्षस्थलं शत्रुमुद्दीरयेत् श्रीभूमिसहितं स्वात्मज्योतिर्हृदयमुदाहरेत् पश्चाद्दीप्तिकराय निःसह
स्रादित्यतेजसे नमोन्तः स्वाहा यो येकिरीटमंत्रोरितः एवं न्यासं ततो कृत्वाध्यायेन्नारायणं परं। उद्य
त्कोटिदिवाकराभमनिशं शंखं गदां पंकजं चक्रं बिभ्रतमिंदिरावसुमती संशोभिपार्श्वद्वयं कोटीरांग
दहारकुंडलधरं पीतांबरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे। विकारलक्षत्वेश
नेपन्मंत्रमेन समाहितः तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः पीठं संपूजयेद्देवं विमलादिसमन्वि

ते विमलोत्कर्षिणी ज्ञाना क्रिया योगेन ततः परं प्रह्वी सत्या तथेशानानुग्रहा नवमी मता नमो भ
गवते सूर्याद्विसंवेष्ट्यपदं वदेत् सर्वभूतात्मने वासुदेवायेति वदेत् ततः सर्वात्मसंयोगपदाद्योग
पद्मपदं ततः पीठात्मने हृदन्तोयं मंत्रात्मासनादिरीरितः दत्वानेनासनं मंत्री मूर्तिं मूलेन कल्पयेत्
आवाह्य पूजयेद्देवं स्वागतादिक्रमादिभिः अंगान्यभ्यर्च्य मंत्राणि केसरेषु समर्चयेत् दलेषु वा
सुदेवाद्या मूर्तीः शक्तिसमन्विताः वासुदेवं संकर्षणं प्रद्युम्नमनिरुद्धकं हिमपीतनमालेन्द्रनी
लाभान् पीतवाससः शंखचक्रगदांभोजधराश्चतुर्भुजाः शान्तिं श्रियं सरस्वत्यां रतिं कोणद
गुरुश्रवित्ता: लेषु ताः श्वेतकांचनगोरोचनदूर्वावर्णा हेतीर्नवदलाग्रेषु चक्रं शंखं गदां च जे कौस्तुभं मुस
लं खड्गं वनमालां यथाक्रमात् रक्ताच्छपीतकनकश्यामकृष्णासितांशुवान् वहिरग्रे समभ्यर्चेद्
गरुडं कुंकुमप्रभं मुक्तामाणिक्यसंकाशौ दक्षिणोत्तरयोर्निधी ध्वजं वरुणदिग्भागे श्यामलं पूज
येत् ततः अरुणं विघ्नमाग्नेये श्याममार्यं निशाचरे श्यामं डोगिं वायुकोणे सेनान्यं पीतमीश्वरे इंद्रा
दीन् पूजयेत् स्वाहद्वाद्यायुधसंयुतान् इति संपूजयेद्विष्णुं प्रोक्तैरावरणैः सह धर्मार्थकाममोक्षाप्तये
प्रण विष्णोः साधकसत्तमाः अथातो वैदिकं भगवते [stain] वासुदेवाय कीर्तितः प्रधानं वैष्णवे तंत्रे मंत्रोयं द्वाद
शाक्षरः ऋषिः प्रजापतिश्छन्दो गायत्री परिकीर्तिता देवतास्य मनोः प्रोक्ता वासुदेवो मनीषिभिः
तारेण हृदयं प्रोक्तं नम सा शिर ईरितं चतुर्वर्णैः शिखा प्रोक्ता पंचार्णैः कवचं मतं समस्तेन भवे
दस्त्रमंगकल्पनमीरितं मूर्ध्नि भाले दृशोरास्ये गले दोर्हृदयांघ्रिजे ॐ तेना भो भजे भा नु हृदये पा
दद्वये न्यसेत् विष्णुं शशधरं दं हृदकोटिसदृशं शंखं रथांगं गदा मंभोजं दधतं सिताब्जनिलयं कां

शा. टी.
ति.
८४

स्मा जगन्मोहनं श्यामवर्णं गदाहारकुंडलमहामौलिस्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं वं
दे मुनींद्रैः स्तुतं। वर्णलक्षं जपेन्मंत्रं दीक्षितो विजितेंद्रियः तत्सहस्रं प्रजुहुयात्तिलैराज्यपरिप्लुतैः
पीठे प्रागीरिते मूर्तिं मूलमंत्रेण कल्पयेत् पूजयेद्विधिनानेन वासुदेवं विधानवित् प्रथमावृतिरंगैः
स्याद्वासुदेवादिभिः परा शांत्यादिशक्तिसहितैः परा द्वादशमूर्तिभिः चतुर्थी मरनाथाद्यैर्वज्राद्यैः पं
चमी मता एवं संपूजितो विष्णुः प्रदद्यादिष्टमात्मनः पायसेन घृताक्तेन मंत्रवर्णसहस्रकं जुहुया
न्मनसः शुद्ध्यै समिद्भिः क्षीरभूरुहान् तत्संख्यया पयोक्ताभिः सर्वपापविमुक्तये हृल्लेखाबीजयुग
ले रमाबीजयुगं ततः लक्ष्मीवासुदेवाय हृदंतः प्रणवादिकः चतुर्दशाक्षरः प्रोक्तो मंत्रोयं स्मरपाद
पः हृदयं शक्तिबीजाभ्यां रमाभ्यां शिर ईरितं लक्ष्मीप्रोक्ता शिखा वर्म वासुदेवाय कीर्तितं नमसा
स्त्रं समुद्दिष्टं सर्वं नारादि कल्पयेत् विद्युच्चंद्रनिभं वपुः कमलजा वैकुंठयोरेकतां प्राप्तं स्नेहवशा
न्नरत्नविलसद्भूषाभरालंकृतं विद्यापंकजदर्पणं मणिमयं कुंभं सरोजं गदां शंखं चक्रमसूनि वि
भ्रदमितो दिश्यात् श्रियं वः सदा। वर्णलक्षं जपेदेनं तत्सहस्रं सरोरुहैः होमं कुर्यात् द्विकसितैर्मधु
रत्रयसंप्लुतैः पूजा स्याद्वैष्णवे पीठे द्वादशाक्षरवर्त्मना पायसेन कृतो होमो लक्ष्मीवश्यप्रदो भवेत्
मधुराक्तैस्तिलैर्हुत्वा सर्वकार्याणि साधयेत् नागोद्हिमैर्वपद्माढ्यैः स्मरपतिर्भवेत् महाबला।
षट्‍दंष्ट्रं मंत्रराडष्टादशाक्षरः ऋषिर्विराट् छंदो देवता दधिवामनः हृदेकेन शिरो द्वाभ्यां शिखा
त्रिभिरुदाहृता कवचं पंचभिः प्रोक्तं नेत्रं तावद्भिरक्षरैः द्वाभ्यामस्त्रमिति प्रोक्ता प्रकारोङ्गस्य सूरिभिः
मूर्ध्नि भाले दृशोर्युग्मे कर्णनासोष्ठतालुषु कंठे बाहुद्वये पृष्ठे हृदयोदरनाभिषु गुह्योरुजानुयुग्मेषु
भा

74

जंघयोः पादयोर्न्यसेत् अष्टादशमनोर्वर्णान्यस्यैवं विचिंतयेत् । मुक्तागौरं नवमणिलसद्भूषणं
वेदसंख्यैर्भृंगाकारैरलकनिकरैः शोभिवक्त्रारविंदं हस्ताब्जाभ्यां कलशममृततोयाभिपूर्णं दध्यन्ना
पूर्णकनकचषकं धारयंतं भजामः । गुणलक्षं जपेन्मंत्रं तद्दशांशं घृतप्लुतैः पायसान्नैः प्रजुहुयाद्दद्या
न्नैवेद्यं यथाविधि । वैष्णवे कल्पिते पीठे प्राग्युक्तेन समर्चयेत् मूर्तिं मूलेन संकल्प्य वक्ष्यमाणविधानतः
षडंगानि समभ्यर्च्य केसरेषु यथाविधि अभ्यर्च्य वासुदेवादीन्ध्वजादीनर्चयेत्ततः ध्वजं चैवैनतेयं च कौ
स्तुभं वनमालिकां शंखं चक्रं गदां शार्ङ्गं दलेषु संप्रपूजयेत् केशवाद्यान्दलाग्रेषु इंद्रादींस्तदनंतरं
वज्रादीनि निगमानष्टौ समावरणमीरितं विधानमेतद्देवस्य कीर्तितं सुरपूजितं पायसान्नेन जुहुयात्स
हस्रं श्रियमाप्नुयात् धान्यहोमेन धान्यानि शालिपुष्पासमुद्भवैः बीजैः सहस्रसंख्याकैः होमो भयविनाश
नः दध्योदनेन मधुना हुत्वा मुच्यते तुरगैः स्वर्णाद्यैर्विक्रमे रूपं जपेन्मंत्रः मनस्वधीः मंत्रोऽयं चाद्रवैल
घोनात्र कार्या विचारणा पुष्पैः संपाद्य देवेशं भिल्लो वा पूजयेत्सुधीः सर्गायितं समे नित्यं मरहितो श्रियम
श्नुते । समाध्यतारोललकर्णिकांतमष्टास्त्रैः कमलकेसराभ्यां मंत्रान्तरद्वंद्वपुनाष्टपत्रं पिष्टाणीयु।
ग्मो लसितान्यपत्रे । द्वादशांतरसंवीतं तद्बहिः मातृकात्तैः विद्याद्वेष्टितं यंत्रं सर्वसंपत्प्रदायकं
बुद्धिरत्नदमाभाष्य प्रणवो ह्रीं यशाहूतः सर्ववागीश्वरेत्ते च ववदे दीश्वरेत्यथ सर्ववेदमयाचिंत्यप
दांते सर्वं समुच्चरेत् वोपयद्धितयांतो यं तारादिस्त्रकर्णकः ऋषिर्ब्रह्मास्य निर्दिष्टश्छंदोऽनुष्टुबुदाहृ
तं देवतास्याद्धयग्रीवो वागैश्वर्यप्रदो विभुः तारेण पादैर्मंत्रस्य पंचांगानि प्रकल्पयेत् । शरच्छशांक
प्रभमच्छवर्णं मुक्तामयैराभरणैरुपेतं रथांगशंखौ चिनवाहुपुस्तं ज्ञानं हयनामकं भजामः ।। वर्णं

देशाकेन्द्रैः समाख्यातो रामो राक्षसमर्दनः दीर्घभाजास्ववीजेन कुर्यादंगानि षट्क्रमात् परः
अनंतोऽस्मासनः सेतुर्बीजं रामाय हृन्मनुः षडक्षरोऽय
ब्रह्मरंध्रे भ्रुवोर्मध्ये हृन्नाभ्यं घ्रियुग पादयोः ८३
मादिष्टो भजतां कामदो

शा० दी०
ति०
८५
75

लक्षं जपेन्मंत्रं ॐ दशांशैर्भस्मभः। दशांशं वै स्नवेहोमं जुहुयान्मंत्रसिद्धये अष्टाक्षरो दिने पीठं हृदयं पूर्वं
प्रपूजयेत् वीजेन मूर्तिं संकल्प्य वीजस्तु ह्रियते यथा वियज्जुयस्य मध्ये स्थाविन्दुमहीजमीरितं केसरे
षु वर्णैर्वेदास्त्रत्त दिक्षु समर्चयेत् विदिक्षु गंस्तुतिम्नाय सर्वेषां स्त्राणि पूजयेत् अर्चयेन्मत्रमध्ये तु वि
धानेनांगदेवताः वाह्ये लोकेश्वरास्तेषां वज्राद्यस्त्राणि संयजेत् एवं यो भजते देवं साक्षाद्रागोऽस्य रोभवे
न् विल्वैः फलैः कृतो होमः श्रीकरः परिगीयते ॐ दत्वा पुष्पाणि जुहुयादिच्छन्वाक् श्रियमव्ययां मत्रना
९
नेन संजप्तं स्तुतं ब्राह्मीरसे ... तं कविता मावहेत्तं सामनर्गलविजृम्भिणी वश्या मनेन संजप्तं भक्तयेन्मा
तरन्वहं सर्ववेदागमादीनां व्याख्याना जायते विरात् मनोरस्य समो नास्ति ज्ञाने सार्ये प्रदोमणिः ब्रह्मा
प्रोक्तोऽस्तु निच्छंदो गायत्रं देवता मनोः षडक्षराणि विन्यसेन्मंत्रस्य मनुवित्तमः। कालांभोधरकांतिकांत
मनिशं वीरासनाध्यासितं मुद्रां ज्ञानमयीं दधानमपरं हस्तांबुजे जानुनि सीतां पार्श्वगतां सरोरुहकरां
विद्युन्निभां राघवं पश्यंती मुकुटांगदादिविविधाकल्पोज्वलांगं भजे। वर्णलक्षं जपेन्मंत्रं दशांशं क
मलैः शुभैः जुहुयाद् चितेवह्नौ ब्राह्मणान्भोजयेत्ततः पूजयेद्वैष्णवे पीठे मूर्तिं मूलेन कल्पयेत् श्री।
सीतायै दिक्षु ठान्तेन सीतां पार्श्वगतां यजेत् अग्रे पार्श्वद्वये शार्ङ्गःशरानेगानितद्बहिः हनूमंतं ससुग्रीवं भ
रतं सविभीषणं लक्ष्मणं गदशत्रुघ्नौ जाववंतं दले ष्विमान् वाचयंते हनूमंतमग्रतो ... त पुस्तकं प
से ङ्करतशत्रुघ्नौ पार्श्वयोर्धृतचामरौ धृतातपत्रे हस्ताभ्यां लक्ष्मणं पश्चिमे यजेन्नेत् स्वष्टिं जयंतं विजयं स
राष्ट्रं राष्ट्रवर्धनं अकोपं धर्मपालाख्यं सुमंत्रं च दलाग्रतः सर्वाभरणसंपन्नाल्लोकेशान् चयेत्ततः तद
स्त्राणि ततो वाह्ये वज्रादीनि प्रपूजयेत् एवं पूजादिभिः सिद्धमनोः कर्माणि साधयेत् जातीप्रसूनैर्जुहु

याम्बुदन्तोभः समुत्थितैः राजवश्याय कमलैर्धनधान्यादिसंपदे नीलोत्पलानां होमेन वश्ययेदखिलं
जगत् विल्वप्रसूनैर्जुहुयादिंदिरावाप्तये नरः दूर्वाहोमेन दीर्घायुर्भवेन्मंत्री निरामयः रक्तोत्पलहुतान्मं
त्रीधनमाप्नोति वांछितं मेधाकामेन होतव्यं पलाशकुसुमैर्नवैः नजन्मंभः प्रपिवेत कविर्भवति वत्सरा
त् तन्मंत्रितान्नं भुंजीत महारोगप्रमाप्नुयात् नारमध्ये विलिखेत् मंत्रं षट्सु कोणेषु सेषिबुंगमा।
योस्मरमपि लिखेत् कोणगेहेषु पश्चात् किंजल्केषु स्वरगणमथो पत्रमध्येषु मालामंत्रोन्यार्णान्रह
सुखमितान् अष्टमे पंचवर्णान्। दशान्तरेण संवेष्ट्य कादिवर्णैः भूपुरे दिग्विदिक्षु लिखेद्बीजं नरसिंह
वराहयोः नमो भगवते श्रीपाश्वलक्ष्मीरघुनंदन रक्तोद्भवविशदायांते मधुरं हि समीरयेत् प्रसन्नवदना
येति पश्चादमिततेजसे वालाय पश्चाज्ञमाय विस्मवेत्तदनंतरं प्रणवादिनमोंतोयं मालामन्त्र उदीरितः
जानकीवल्लभायाथ भवेत्तावकवल्लभा ह्रमादिरेष कथितो राममंत्रो दशाक्षरः जपादिसाधितं यंत्रं स्व
र्णपट्टादिकल्पितं वाहुनाविष्टतं दध्याद्विजयश्रीपराक्रमान् गदितो राममंत्रोस्य विधानस्मरणानितं
तारं नमो भगवते वराहरूपाय दमीरयेत् रूपाय भूर्भुवः स्वः स्यात्पतये तदनंतरं भूपतित्वं मे प्रदापतेदद्यांते
वद्दापय वह्निजायावधिर्मंत्रः स्यात्त्रयोविंशदक्षरः भार्गवोस्य मुनिराख्यातश्छंदोनुष्टुबुदाहृतं देव
तादिव्यवराहस्तो मंत्रस्य कथितो बुधैः एकदंष्ट्राय हृदयं व्योमोल्काय शिरः स्मृतं शिखा तेजोधिपतये
